No of Questions : 30

No of Pages : 3

नामांक

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

# माध्यमिक परीक्षा, 2019

# तृतीय भाषा–संस्कृतम्

# मॉडल पेपर प्रथम

**समय : 3.15 घण्टे** **पूर्णांक : 80**

**परीक्षार्थियों के लिए के लिये सामान्य निर्देश :–**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत–माध्यमेन एव लेखनीयानि।

---

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

तस्मिन् काले उत्तरभारते मुगलवंशीयानां शासकानां शासनम् आसीत्। राजानः तत्सेवामेव स्वकर्त्तव्यं मन्यमानाः देशरक्षाकर्त्तव्याद् सर्वथा विमुखाः आसन्। मुगलशासकस्य साहाय्यं विधाय आत्मगौरवं मन्यन्ते स्म। शत्रुभिः सह दीर्घकालीनानां युद्धानां कारणेन मेवाड़राज्य–स्थितिः समीचीना न आसीत्। यद्यपि प्रतापस्य पिता महाराणा उदयसिंहः प्रतापी राजा आसीत्, किन्तु परिस्थितिवशात् चित्तौड़ादिस्थानानि आक्रानतृभिरधिगृहीतानि। अतएव सिंहासनमधिरूढ़ः प्रतापः हस्तच्युतान् प्रमुखदुर्गान् प्राप्तुं चिन्तनमारेभे। प्रथमं सः स्वस्वामिभक्तसामन्तानां स्थानीयभिल्लजनानां च सभाम् आकारितवान्। तत्रैव सः प्रतिज्ञां कृतवान्– "यावत् अहं हस्तच्युतान् स्वराज्यभागान् पुनः न प्राप्स्यामि, तावत् सुवर्णपात्रेषु भोजनं न करिष्यामि, राजप्रासादे वासं न करिष्यामि, मृदुतल्पे च शयनं करिष्यामि"

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

प्रतापस्य राज्यकाले 'अकबर' इति नामकः मुगलशासकः आसीत्। अकबरस्य सेनया सह प्रतापस्य अनेकवारं युद्धम् अभवत्। मुख्ययुद्धं हल्दीघाटीस्थाने अभवत्, अतएव एतत् 'हल्दीघाटीयुद्धम्' इति नाम्ना प्रसिद्धमस्ति। अस्मिन् युद्धे प्रतापः 'चेतक' इति नामके अश्वे आरुह्य बहुशौर्यं प्रदर्शितवान्। प्रतापस्य सेना पर्वतीययुद्धेषु कुशला आसीत्। अतएव मुगलसेनायाः अतिक्षतिः जाता। मुगलसेना स्थानीयजनानां विरोधकारणेन परावर्तिता। अस्मिन् युद्धे प्रतापस्य राज्येऽपि जनक्षतिः धनक्षतिश्च संजाताः। तस्य सेनाऽपि धनाभावे विघटिता। परं प्रतापः कदापि पराजयं न स्वीकृतवान्। अरण्यगुहाप्रदेशेषु उषित्वा स्वसंकल्पसिद्धये सैन्यसंग्रहणम् उपाक्रमत। सैन्यसंग्रहणं तत्प्रशिक्षणं च बहुवित्तसाध्यं कार्यम्। महता दारिद्र्येण परितप्यमानस्य प्रतापस्य इदमेव बहुचिन्ताकारणमासीत्।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

जय जय हे भगवति सुरभारति! तव चरणौ प्रणमामः।



www.rbse.online

नाद–ब्रह्ममयि जय वागीश्वरि! शरणं ते गच्छामः।।

**अथवा**

2. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5
उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः।।

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 4
न भोगभवने रमणीयम्
न च सुखशयने शयनीयम्
अहर्निशं जागरणीयम्
लोकहितं मम करणीयम्।।

**अथवा**

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 4
पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाण–खण्डेषु रत्नसंज्ञां विधीयते।।

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3
**बालः** – जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।
**प्रथमा** – अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि? हन्त, वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।
**द्वितीया** – एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं नं मुञ्चसि।
**बालः** – (सस्मितम्) अहो, बलीयः खलु भीतोऽस्मि! (इत्यधरं दर्शयति)।
**प्रथमा** – वत्स एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।
**बालः** – कुत्र? देह्येतत्। (इति हस्तं प्रसारयति)

**अथवा**

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3
**प्रतापः –** (साश्चर्यम्) किम् इदं भवान् करोति? भवदीया सम्पत्तिः कथं मदीया? किम् एतेन न मे अपमानः? न अहं दत्तां सम्पत्तिं पुनराददामि।
**भामाशाहः –** (सविनयम्) महाराज! न अहम् अपमानं करोमि। का तुच्छ–सेवके शक्तिः यया असौ तथा दुःसाहसं कुर्यात्। गृह्यतां महाराज! गृह्यताम्! देश–धर्मयोः रक्षा विधीयताम्!
**प्रतापः –** (सहर्षम् आदाय) धन्यः असि मन्त्रिवर्य! धन्यः। त्वदीया जननी धन्या। कथ्यतां तु अभिन्नहृदय! अस्यां कियती सम्पत्तिः?

5. अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु– 3
1. चित्रग्रीवम् अवहेलयन् कपोतः सदर्पं किम् उक्तवान्?
2. भारतस्य दक्षिणस्यां दिशि किं स्थितम् अस्ति?
3. वर्षागमे मरोः शोभा कीदृशी भवति?
4. द्वितीया तापसी प्रथमां किमादिशति?

5. 'भारत–वैभवम्' इति पाठः कस्माद् ग्रन्थाद् गृहीतः वर्तते।
6. भामाशाहः कः आसीत्?
7. स्वामिकेशवानन्दस्य जन्म कदा अभवत्?
8. कुत्र लज्जा त्यक्तव्या सुखार्थिना?

**प्रश्न संख्या 6–9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु–**

**6.** भारतमाता नानतीर्थैः रमणीया। 1

**7.** मरुदेशे तित्तिराणां मधुरः विरावः भवति। 1

**8.** भामाशाहः देशरक्षायै स्वसम्पत्तिं समर्पयति। 1

**9.** मम लोकहितं करणीयम्। 1

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु– 3

**11.** अधोलिखितं गद्यांशं पठित्वा एतादाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–

सताम् आचारः सदाचारः इति कथ्यते। सज्जनाः यथा आचरन्ति तथैव आचरणं सदाचारो भवति। ते सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। तेषु सत्याचरणं, वाक्संयमः, विनयः, अक्रोधः, क्षमा, धर्माचरणमित्यादयः सद्–गुणाः दृश्यन्ते। सदाचारस्य सत्तयैव संसारे जनः उन्नतिं करोति। देशस्य, राष्ट्रस्य, समाजस्य, जनस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारेणैव जनाः ब्रह्मचारिणो भवन्ति। सदाचारेणैव शरीरं परिपुष्टं भवति। सदाचारेण बुद्धिः वर्धते। सदाचारेणैव मनुष्यः सत्यभाषणम् अन्यच्च सत्कर्म कर्तुं प्रवृत्तो भवति। अतएव पूर्वैः महर्षिभिः 'आचारः परमो धर्मः' इत्युक्तम्।

संसारे सर्वत्र सदाचारस्यैव महत्त्वं दृश्यते। ये सदाचारिणो भवन्ति, ते एव सर्वत्र आदरं लभन्ते। वेदरामायणमहाभारतेष्वपि सदाचारस्य महिमा वर्णिता वर्तते। सदाचाराभावेनैव चतुर्वेदविदपि रावणो राक्षस इति कथ्यते। अतः सर्वैः जनैः स्वोन्नत्यै सदा सदाचारः पालनीयः।

1. अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 1
2. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) केषाम् आचारः सदाचारः इति कथ्यते? 1
   (ख) केन बुद्धिः वर्धते? 1
   (ग) कया संसारे जनः उन्नतिं करोति?
   1
   (घ) महर्षिभिः आचारः कीदृशो धर्मः कथितः? 1
   (ङ) सर्वैः जनैः स्वोन्नत्यै सदा कः पालनीयः? 1
3. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) "सदाचारेणैव शरीरं परिपुष्टं भवति" इत्यस्मिन् वाक्ये कर्तृपदं किमस्ति?
   1
   (ख) "सर्वैः जनैः" इत्यनयोः पदयोः विशेषणपदं किम्? 1
   (ग) "क्रोधः" इत्यस्य किं विलोमपदमत्र प्रयुक्तम्? 1
   (घ) "ते एव सर्वत्र आदरं ..........।" अत्र पूरणीयं समुचितं क्रियापदं किम्? 1

**12.** अधोलिखितपदयोः संधिविच्छेदं कृत्वा संधेः नामापि लिखतु। 2

1. मात्रंशः
2. वागीशः

**13.** अधोलिखितपदयोः संधिं कृत्वा सन्धेः नामापि लिखतु। 2

1. जगत् + ईशः
2. सुर + इन्द्रः

**14.** अधोलिखितरेखांकित-पदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत-

1. यथाशक्ति सहायतां करिष्यामि। 1
2. रामायणम् महत् काव्यम् अस्ति। 1
3. पाणी च पादौ च प्रक्षालनं कुरू। 1

**15.** अधोलिखित रेखांकितपदेषु विभक्तिं तत् कारणं च लिखत।

1. विद्यालयं परितः वृक्षाः सन्ति। 1
2. अहं मित्रेण सह क्रीडामि। 1
3. विद्यालयात् पृथक् छात्रावासः अस्ति। 1

**16.** कोष्ठकेषु प्रदत्त-प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।

1. कार्यं तु सदैव ध्यानेन एव ........... । (कृ + अनीयर्) 1
2. ........... बालकः चित्रम् पश्यति। (पठ् + शतृ) 1

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

1. सः ग्रामं गच्छान् तृणं पश्यति। 1
2. विद्योत्तमा नीतिमती आसीत्। 1

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु-

| अपि, इव, तत्र, यथा |
|---|

अपि, इव, तत्र, यथा

1. गृहीत .......... केशेषु मृत्युना धर्ममाचरेत्। 1
2. कथमहं .......... गच्छामि। 1
3. जननी जन्मभूमिश्च स्वर्गाद् .......... गरीयसी। 1

**निर्देशः- प्रश्नसंख्या 19-21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु-**

**19.** रामेण ग्रामः गम्यते। 1

**20.** सीतया पुस्तकं पठ्यते। 1

**21.** त्वां मां पृच्छति। 1

**22.** घटिका चित्रसहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु-



1. मोहनः प्रातः काले .......... वादने विद्यालयं गच्छति। 1
2. चालकः .......... वादने कारयानं चालयति। 1

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–
1. द्वौ बालिके गच्छतः। 1
2. ग्रीष्मे पल्लवलानि शुष्यति। 1
3. मनुः मधुरः फलं खादति। 1

**24.** भवान् राजकीय–आदर्श–उच्च–माध्यमिक–विद्यालय–जयपुरस्य दशमकक्षायाः विद्यार्थी रमेशः। 4
भवतः पिता अतीव निर्धनः अस्ति। स्वस्य प्रधानाचार्याय शुल्कमुक्त्यर्थम् एकं प्रार्थनापत्रं लिखतु।

**अथवा**

**24.** भवान् विनयः। स्वकीयं मित्रं राजेशं प्रति स्वविद्यालयस्य वार्षिकोत्सवविषये अधोलिखितपत्रं मंजूषापदसहायतया पूरयित्वा लिखतु। 4

| |
|---|
| परिवारे, वार्षिकोत्सवस्य, पत्रोत्तरं, स्वकरकमलेन, कुशलताम्, विविधाः, स्वीकृतवान्, पुरस्कारम |

उदयपुरतः
दिनांक : 18.03.20....
प्रियमित्रं राजेश।
नमस्ते।
अत्र अहं कुशलं, भवतः ........... कामये। फरवरी मासे पञ्चमे दिनांके मम विद्यालये .......... आयोजनम् अभवत्। अस्मिन् दिवसे ........... प्रतियोगिताः अभवन्। अहमपि धावनप्रतियोगितायां, वादविवादप्रतियोगितायां च भाग ...........। पुरस्कारवितरणसमारोहे अस्माकं क्षेत्रस्य विधायकमहोदयः .......... पुरस्कारवितरणं कृतवान्। अहमपि .......... प्राप्तवान्।

अस्तु .......... सर्वेभ्यः यथायोग्यं नमस्काराः, .......... शीघ्रमेव प्रेषणीयम्।
भवतः मित्रम्
विनयः

**25.** मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं संवादं पूरयत। 4

| |
|---|
| **मञ्जूषा**– करिष्यामि, मित्रम्, पुत्र, कृत्वा, क्रीडाक्षेत्रम्, गृहकार्यं, गच्छामि, क्रिकेट्–प्रतियोगिता। |

**माता** – ..........., त्वम् कुत्र गच्छसि?
**पुत्रः** – मातः, अहम् ............. गच्छामि।
**माता** – किं तव .......... सम्पूर्णम् अस्ति?
**पुत्रः** – यदा अहम् क्रीडाक्षेत्रात् आगमिष्यामि तदा ..........।
**माताः** – प्रतिदिनं तु गृहकार्यम् .......... खेलसि।
**पुत्रः** – मातः, अद्य .......... अस्ति।
**माता** – पश्य, तव .......... सुनीलः आगच्छति।
**पुत्रः** – .......... अहम्।

**26.** अधोलिखितषड् वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4


www.rbse.online

1. विद्या विनम्रता प्रदान करती है।
2. जननी और जन्मभूमि स्वर्ग से भी महान हैं।
3. विपत्ति के समय दोषारोपण करना ही कायरपुरुष का लक्षण है।
4. कृष्ण के चारों ओर बालक हैं।
5. हम सब नाटक देखते हैं।
6. राजेश महेश का मित्र है।

**27.** अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया संस्कृते षट् वाक्यानि रचयतु– 3

राजमार्गस्य चित्रम् वाहनानि

शीघ्रं गृहं भारयुक्तवस्तूनि

प्रेषयितुं शक्नुवन्ति दुर्घटनाः

सावधानेन चालयामः सम्भावनाः




**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखत–

| |
|---|
| **मञ्जूषा–** सत्पुरुषाः, कर्मणा, परस्य, हृदयं, प्रतिष्ठा, परोपकारः। |

परेषाम् प्राणिनामुपकारः परोपकरोऽस्ति। (i) .......... हितसम्पादनं मनसा वाचा (ii) .......... चान्येषां हितानुष्ठानमेव परोपकारशब्देन गृह्यते। संसारे (iii) .......... एव स गुणो विद्यते, येन मनुष्येषु सुखस्य (iv) .......... वर्तते। परोपकारेण (v) .......... पवित्रं सरलं सरसं सदयं च भवति। (vi) .......... कदापि न स्वार्थतत्पराः भवन्ति।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। 3

1. लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।
2. एकः बुभुक्षितः शृगालः भोजनार्थं वने इतस्ततः भ्रमति स्म।
3. परं तथापि द्राक्षाफलानि न प्राप्नोत्।
4. एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।
5. ‘एतानि द्राक्षाफलानि अम्लानि” इति उक्त्वा कुपितः शृगालः ततः गतः।
6. तानि खादितुं सः नैकवारं प्रयासम् अकरोत्।

*******

# राजस्थान बोर्ड परीक्षा 2019
# 10वीं कक्षा
# तृतीय भाषा–संस्कृतम्
# मॉडल पेपर–प्रथम

**समय : 3.15 घंटे** **(पूर्णांक : 80)**

**परीक्षार्थियों के लिये सामान्य निर्देश :–**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत–माध्यमेन एव लेखनीयानि।

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

तस्मिन् काले उत्तरभारते मुगलवंशीयानां शासकानां शासनम् आसीत्। राजानः तत्सेवामेव स्वकर्त्तव्यं मन्यमानाः देशरक्षाकर्त्तव्याद् सर्वथा विमुखाः आसन्। मुगलशासकस्य साहाय्यं विधाय आत्मगौरवं मन्यन्ते स्म। शत्रुभिः सह दीर्घकालीनानां युद्धानां कारणेन मेवाड़राज्य–स्थितिः समीचीना न आसीत्। यद्यपि प्रतापस्य पिता महाराणा उदयसिंहः प्रतापी राजा आसीत्, किन्तु परिस्थितिवशात् चित्तौड़ादिस्थानानि आक्रान्तृभिरधिगृहीतानि। अतएव सिंहासनमधिरूढः प्रतापः हस्तच्युतान् प्रमुखदुर्गान् प्राप्तुं चिन्तनमारेभे। प्रथमं सः स्वस्वामिभक्तसामन्तानां स्थानीयभिल्लजनानां च सभाम् आकारितवान्। तत्रैव सः प्रतिज्ञां कृतवान्– "यावत् अहं हस्तच्युतान् स्वराज्यभागान् पुनः न प्राप्स्यामि, तावत् सुवर्णपात्रेषु भोजनं न करिष्यामि, राजप्रासादे वासं न करिष्यामि, मृदुतल्पे च शयनं करिष्यामि"

**उत्तरम् :**

**प्रसंग–** प्रस्तुत गद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'महाराणा–प्रतापः' शीर्षक पाठ से उद्धृत है। इसमें महाराणा प्रताप के देश–प्रेम, त्याग, दृढ़–प्रतिज्ञा एवं साहस का प्रेरणास्पद वर्णन किया गया है।

**हिन्दी अनुवाद–** उस समय उत्तर–भारत में मुगल शासकों का शासन था। राजा लोग उनकी सेवा को ही अपना कर्त्तव्य मानकर देश–रक्षा के कर्त्तव्य से सर्वथा विमुख हो गये थे। मुगल–शासक की सहायता करके आत्मगौरव मानते थे। शत्रुओं के साथ लम्बे समय तक के युद्धों के कारण मेवाड़ राज्य की स्थिति ठीक नहीं थी। यद्यपि प्रताप के पिता महाराणा उदयसिंह प्रतापी राजा थे, किन्तु परिस्थिति के कारण चित्तौड़ आदि स्थानों को आक्रमणकारियों द्वारा अधिगृहीत कर लिये गये थे। इसीलिए सिंहासन पर विराजमान प्रताप ने अपने नियंत्रण से अलग हुए प्रमुख दुर्गों (किलों) को प्राप्त करने के लिए चिन्तन करना प्रारम्भ कर दिया। सबसे पहले उन्होंने अपने स्वामिभक्त सामन्तों और स्थानीय भीलों की सभा बुलाई। वहीं पर उन्होंने प्रतिज्ञा की–

"जब तक मैं अपने नियंत्रण से अलग हुए अपने राज्य के भागों को फिर से प्राप्त नहीं करूँगा, तब तक सोने के पात्रों में भोजन नहीं करूँगा, राजमहल में निवास नहीं करूँगा और कोमल बिस्तर पर शयन नहीं करूँगा।"

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

प्रतापस्य राज्यकाले 'अकबर' इति नामकः मुगलशासकः आसीत्। अकबरस्य सेनया सह प्रतापस्य अनेकवारं युद्धम् अभवत्। मुख्ययुद्धं हल्दीघाटीस्थाने अभवत्, अतएव एतत् 'हल्दीघाटीयुद्धम्' इति नाम्ना प्रसिद्धमस्ति। अस्मिन् युद्धे प्रतापः 'चेतक' इति नामके अश्वे आरुह्य बहुशौर्यं प्रदर्शितवान्। प्रतापस्य सेना पर्वतीययुद्धेषु कुशला आसीत्। अतएव मुगलसेनायाः अतिक्षतिः जाता। मुगलसेना स्थानीयजनानां विरोधकारणेन परावर्तिता। अस्मिन् युद्धे प्रतापस्य राज्येऽपि जनक्षतिः धनक्षतिश्च संजाताः। तस्य सेनाऽपि धनाभावे विघटिता। परं प्रतापः कदापि पराजयं न स्वीकृतवान्। अरण्यगुहाप्रदेशेषु उषित्वा स्वसंकल्पसिद्धये सैन्यसंग्रहणम् उपाक्रमत। सैन्यसंग्रहणं तत्प्रशिक्षणं च बहुवित्तसाध्यं कार्यम्। महता दारिद्र्येण परितप्यमानस्य प्रतापस्य इदमेव बहुचिन्ताकारणमासीत्।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत गद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'महाराणा–प्रतापः' शीर्षक पाठ से उद्धृत है। इस अंश में अकबर के साथ महाराणा प्रताप के हुए सुप्रसिद्ध हल्दीघाटी के युद्ध का वर्णन है। इसमें प्रताप की वीरता एवं देशभक्ति को दर्शाया गया है।

**हिन्दी अनुवाद–** प्रताप के राज्य–काल में 'अकबर' नामक मुगल–शासक था। अकबर की सेना के साथ प्रताप का अनेक बार युद्ध हुआ। मुख्य युद्ध 'हल्दी–घाटी' नामक स्थान पर हुआ था, इसलिए यह 'हल्दीघाटी का युद्ध' नाम से प्रसिद्ध है। इस युद्ध में प्रताप ने 'चेतक' नामक घोड़े पर सवार होकर अत्यधिक पराक्रम को दिखलाया। प्रताप

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

की सेना पर्वतीय युद्धों में कुशल थी। इसलिए मुगल-सेना की अत्यधिक हानि हुई। मुगल-सेना स्थानीय लोगों के विरोध के कारण से लौट गई। इस युद्ध में प्रताप के राज्य में भी जन-हानि और धन-हानि हुई। उसकी सेना भी धन के अभाव में बिखर गई। किन्तु प्रताप ने कभी भी पराजय को स्वीकार नहीं किया। वन और गुफा के क्षेत्रों में रहकर अपने संकल्प की सिद्धि के लिए सेना का संग्रह किया। सेना का संग्रह और उसका प्रशिक्षण अत्यधिक धन से ही किया जा सकता था। अत्यन्त दरिद्रता से पीड़ित हुए प्रताप की चिन्ता का यही प्रमुख कारण था।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

जय जय हे भगवति सुरभारति! तव चरणौ प्रणमामः।
नाद-ब्रह्ममयि जय वागीश्वरि! शरणं ते गच्छामः।।

**उत्तरम् :**

**अन्वयः-** जय, जय हे भगवति! सुरभारति! तव चरणौ प्रणमामः। जय हे नाद-ब्रह्ममयि! वागीश्वरि! ते शरणं गच्छामः।

**प्रसंग-** प्रस्तुत पद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'जय सुरभारति!' शीर्षक पाठ से उद्धृत किया गया है। मूलतः यह पाठ डॉ. हरिराम आचार्य द्वारा रचित 'मधुच्छन्दा' नामक ग्रन्थ से संकलित है। इस पद्यांश में कवि सरस्वती देवी की वन्दना करते हुए कहता है कि-

**हिन्दी अनुवाद-** हे देवि! हे शब्द की अधिष्ठात्रि देवि! आपकी जय हो, जय हो, हम आपके चरणों में प्रणाम करते हैं। हे शब्दब्रह्ममयि! आपकी जय होवे, हे वाणी की स्वामिनी! हम तुम्हारी शरण में जाते हैं।

**अथवा**

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः।।

**उत्तरम् :**

**अन्वयः-** यत् समुद्रस्य उत्तरं हिमाद्रेः च एव दक्षिणं, यत्र भारती (नाम) सन्ततिः, तत् भारतं वर्षं नाम।

**प्रसंग-** प्रस्तुत पद्य हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'स्वराष्ट्र-गौरवम्' शीर्षक पाठ से उद्धृत है। मूलतः यह पद्य विष्णु-पुराण से संकलित है। इस पद्य में भारत-देश की भौगोलिक स्थिति का वर्णन करते हुए कहा गया है कि-

**हिन्दी-अनुवाद-** जो समुद्र की उत्तर-दिशा में और हिमालय पर्वत की दक्षिण दिशा में भूभाग है, जहाँ भारतीय अर्थात् सरस्वती-पुत्र हैं, वही भारत देश है।

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु- 4

न भोगभवने रमणीयम्
न च सुखशयने शयनीयम्
अहर्निशं जागरणीयम्
लोकहितं मम करणीयम्।।

**उत्तरम् :**

**प्रसंग-** प्रस्तुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'लोकहितं मम करणीयम्' इतिशीर्षकपाठाद् उद्धृतम्। पद्येऽस्मिन् संस्कृतगीतमाध्यमेन भौतिकतां व्यक्त्वा अहर्निशं लोकहिताय कर्त्तव्यस्य प्रेरणा प्रदत्ता।

**संस्कृत-व्याख्या-** कविः कथयति यत् मया सदैव भौतिक-संसारे रमणं नहि कर्त्तव्यम्, सुखदायकशयने शयनं न कर्त्तव्यम्, अहोरात्रं जागरणं कर्त्तव्यम् अर्थात् सावधानतया स्थातव्यम् तथा च लोक-कल्याणं कर्त्तव्यम्।

**विशेषः-**

1. अत्र अत्यन्तसरलभाषया लोककल्याणाय भौतिकसुखत्यागाय च प्रेरणा प्रदत्ता। सदैव सावधानं भूत्वा कार्यं करणीयम्।
2. पद्यस्य भाषा सरला, सरसा मधुरा चास्ति।

**अथवा**

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु- 4

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाण-खण्डेषु रत्नसंज्ञां विधीयते।।

**उत्तरम् :**

**प्रसंग-** प्रस्तुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'सुभाषित-रत्नानि' इतिशीर्षकपाठाद् उद्धृतः। पद्येऽस्मिन् पृथिव्यां वास्तविकरत्नानि कानि सन्तीति विषये वर्णितम्।

**संस्कृत-व्याख्या-** वास्तविकरत्नं किमस्तीति विषये कविः कथयति यत् अस्यां वसुन्धरायां त्रीणि एव रत्नानि सन्ति-जलम्, अन्नम्, सुभाषितञ्चेति। मूर्खजनैः प्रस्तर-खण्डेषु 'रत्नम्' इति नाम प्रदीयते।

**विशेषः-** अत्र कविना वास्तविकरत्नविषये यथार्थं वर्णितम्। वस्तुतः जलम्, अन्नम् सुभाषितञ्चेति रत्नानि सन्ति। एभिः रत्नैः एव मानवस्य शोभा भवति। प्रस्तरखण्डेषु तु मूर्खजनाः एव रत्नं स्वीकुर्वन्ति।

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत-व्याख्यां करोतु- 3

**बालः** - जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।

**प्रथमा** - अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि? हन्त, वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।

**द्वितीया** - एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं नं मुञ्चसि।

**बालः** - (सस्मितम्) अहो, बलीयः खलु भीतोऽस्मि! (इत्यधरं दर्शयति)।

**प्रथमा** - वत्स एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

**बालः** - कुत्र? देह्येतत्। (इति हस्तं प्रसारयति)

**उत्तरम् :**

**प्रसंग-** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये' इतिशीर्षकपाठाद् उद्धृतः। मूलतः पाठोऽयम् 'अभिज्ञानशाकुन्तलस्य' सप्तमांकात् संकलितः। अंशेऽस्मिन् बालकस्य सर्वदमनस्य सिंह-शिशुना सह क्रीडायाः तपस्विनीभ्यां सह च वार्तालापस्य वर्णनं वर्तते-

**संस्कृत व्याख्या-**

**बालकः** - मुखम् उद्घाटय सिंह! तव दन्तानां गणनां करिष्यामि।

**प्रथमा तापसी** - चञ्चलः! कथम् अस्माकं सन्तानतुल्यानि प्राणिनः तुदसि? ओह, तव क्रोधः वर्धते। मुनिजनेन तव 'सर्वदमन' इति नामकरणम् उचितमेव कृतम्।

**द्वितीया तापसी** - निश्चयेन इयम् सिंही भवन्तम् आक्रमणं करिष्यति चेत् तस्याः शिशुं न त्यजसि।

**बालकः** - (मन्दहासपूर्वकम्) अहो, अहम् तु अत्यधिकं भययुक्तमस्मि। (इति कथयित्वा अधरोष्ठं दर्शयति)

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

**प्रथमा तापसी –** पुत्र! इयं सिंहशिशुं त्यज। तुभ्यम् अन्यं क्रीडनकं प्रदास्यामि।

**बालकः –** कुत्रास्ति? तत् क्रीडनकं ददातु। (इति कथयित्वा हस्तं प्रसारयति)

**विशेषः –** अत्र बालस्वभावस्य, चञ्चलतायाः, बालक्रीडायाश्च स्वाभाविकं यथार्थञ्च वर्णनं वर्तते।

**अथवा**

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत-व्याख्यां करोतु– 3

**प्रतापः –** (साश्चर्यम्) किम् इदं भवान् करोति? भवदीया सम्पत्तिः कथं मदीया? किम् एतेन न मे अपमानः? न अहं दत्तां सम्पत्तिं पुनराददामि।

**भामाशाहः –** (सविनयम्) महाराज! न अहम् अपमानं करोमि। का तुच्छ-सेवके शक्तिः यया असौ तथा दुःसाहसं कुर्यात्। गृह्यतां महाराज! गृह्यताम्! देश-धर्मयोः रक्षा विधीयताम्!

**प्रतापः –** (सहर्षम् आदाय) धन्यः असि मन्त्रिवर्य! धन्यः। त्वदीया जननी धन्या। कथ्यतां तु अभिन्नहृदय! अस्यां कियती सम्पत्तिः?

**उत्तरम् :**

**प्रसंग–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वदेशं कथं रक्षेयम्' इति शीर्षकपाठाद् उद्धृतः। पाठोऽयं डॉ. नारायणशास्त्री-कांकरेण विरचितमस्ति। अस्मिन् नाट्यांशे महाराणा प्रताप-भामाशाहयोः वार्तालापं वर्तते। युद्धकाले भामाशाहः स्वदेशरक्षायै प्रतापस्य सहायतायै च स्वसम्पूर्णधनराशिं प्रतापाय समर्पयतीति वर्णितम्।

**संस्कृत व्याख्या–**

**प्रतापः –** (यदा भामाशाहः धनराशिग्रन्थं प्रतापस्य चरणयोः अर्पयति, तदा आश्चर्यपूर्वकम्) भवान् एतद् किं करोति? इयं सम्पत्तिः भवतः वर्तते, तर्हि मम कथं भवितुमर्हति? इत्थं कथयित्वा तु भवान् ममापमानं करोति। पुनश्चाहं प्रदत्तां धनराशिं न स्वीकरोमि।

**भामाशाहः –** (विनम्रतापूर्वकम्) हे महाराज। अहं भवतः अपमानं (तिरस्कारं) न करोमि। अहं तु भवताम् अल्पसेवकोऽस्मि, नास्ति मम सा शक्तिः यया भवतामपमानरूपं दुःसाहसं कर्तुं शक्नोमि। हे महाराज! इमां धनराशिं गृह्यताम्, स्वीक्रियताम्। देशस्य धर्मस्य च रक्षां क्रियताम्।

**प्रतापः –** (हर्षपूर्वकम् गृहीत्वा) धन्योऽसि मन्त्रिश्रेष्ठ! धन्योऽसि! भवतः माता धन्या वर्तते। कथयतु प्रियमित्रम्! अस्यां ग्रन्थिकायां कियती धनराशिः वर्तते?

**5.** अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु– 3

1. चित्रग्रीवम् अवहेलयन् कपोतः सदर्पं किम् उक्तवान्?
2. भारतस्य दक्षिणस्यां दिशि किं स्थितम् अस्ति?
3. वर्षागमे मरोः शोभा कीदृशी भवति?
4. द्वितीया तापसी प्रथमां किमादिशति?
5. 'भारत-वैभवम्' इति पाठः कस्माद् ग्रन्थाद् गृहीतः वर्तते।
6. भामाशाहः कः आसीत्?
7. स्वामिकेशवानन्दस्य जन्म कदा अभवत्?
8. कुत्र लज्जा त्यक्तव्या सुखार्थिना?

**उत्तरम् :**

1. कपोतः सदर्पमाह-ईर्ष्यी, घृणी, असन्तुष्टः क्रोधितः, नित्यशंकितः, पर-भाग्योपजीवी च एते षड् दुःख भागिनः भवन्ति।
2. भारतस्य दक्षिणस्यां दिशि इन्दुमहासागरः स्थितः।
3. वर्षागमे सरः सु शरत् प्रसन्नं सलिलं चकास्ति।
4. गच्छत्वं मदीये उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरः तिष्ठति, तमस्योपहर। इति आदिशति।
5. भारत-भारती-वैभवम्।
6. भामाशाहः मेवाडस्य मंत्री आसीत्।
7. स्वामिकेशवानन्दस्य जन्म पौषमासे 1940 तमे विक्रमसम्वत्सरे (ईस्वी 1883) अभवत्।
8. धन-धान्य प्रयोगेषु, विद्याया संग्रहेषु, आहारे व्यवहारे च सुखार्थिना लज्जा त्यक्तव्या।

**प्रश्न संख्या 6-9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु–**

**6.** भारतमाता <u>नानतीर्थैः</u> रमणीया। 1

**उत्तरम् :**

भारतमाता कैः रमणीया?

**7.** मरुदेशे <u>तित्तिराणां</u> मधुरः विरावः भवति। 1

**उत्तरम् :**

मरुदेशे केषां मधुरः विरावः भवति?

**8.** भामाशाहः <u>देशरक्षायै</u> स्वसम्पत्तिं समर्पयति। 1

**उत्तरम् :**

भामाशाहः किमर्थं/कस्मै स्वसम्पत्तिं समर्पयति।

**9.** मम <u>लोकहितं</u> करणीयम्। 1

**उत्तरम् :**

मम किं करणीयम्?

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु– 3

**उत्तरम् :**

1. अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।
   गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।।
2. धन-धान्य-प्रयोगेषु विद्यायाः संग्रहेषु च।
   आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्।।

**11.** अधोलिखितं गद्यांशं पठित्वा एतादाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–

सताम् आचारः सदाचारः इति कथ्यते। सज्जनाः यथा आचरन्ति तथैव आचरणं सदाचारो भवति। ते सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। तेषु सत्याचरणं, वाक्संयमः, विनयः, अक्रोधः, क्षमा, धर्माचरणमित्यादयः सद्-गुणाः दृश्यन्ते। सदाचारस्य सत्तयैव संसारे जनः उन्नतिं करोति। देशस्य, राष्ट्रस्य, समाजस्य, जनस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारेणैव जनाः ब्रह्मचारिणो भवन्ति। सदाचारेणैव शरीरं परिपुष्टं भवति। सदाचारेण बुद्धिः वर्धते। सदाचारेणैव मनुष्यः सत्यभाषणम् अन्यच्च सत्कर्म कर्तुं प्रवृत्तो भवति। अतएव पूर्वैः महर्षिभिः 'आचारः परमो धर्मः' इत्युक्तम्।

संसारे सर्वत्र सदाचारस्यैव महत्त्वं दृश्यते। ये सदाचारिणो भवन्ति, ते एव सर्वत्र आदरं लभन्ते। वेदरामायणमहाभारतेष्वपि सदाचारस्य महिमा

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

वर्णिता वर्तते। सदाचाराभावेनैव चतुर्वेदविदपि रावणो राक्षस इति कथ्यते। अतः सर्वैः जनैः स्वोन्नत्यै सदा सदाचारः पालनीयः।

1. अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 1
2. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) केषाम् आचारः सदाचारः इति कथ्यते? 1
   (ख) केन बुद्धिः वर्धते? 1
   (ग) कया संसारे जनः उन्नतिं करोति? 1
   (घ) महर्षिभिः आचारः कीदृशो धर्मः कथितः? 1
   (ङ) सर्वैः जनैः स्वोन्नत्यै सदा कः पालनीयः? 1
3. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) "सदाचारेणैव शरीरं परिपुष्टं भवति" इत्यस्मिन् वाक्ये कर्तृपदं किमस्ति? 1
   (ख) "सर्वैः जनैः" इत्यनयोः पदयोः विशेषणपदं किम्? 1
   (ग) "क्रोधः" इत्यस्य किं विलोमपदमत्र प्रयुक्तम्? 1
   (घ) "ते एव सर्वत्र आदरं ..........।" अत्र पूरणीयं समुचितं क्रियापदं किम्? 1

**उत्तरम् :**

1. सदाचारस्य महत्त्वम्।
2. (क) सताम्।
   (ख) सदाचारेण।
   (ग) सदाचारस्य सत्तयैव संसारे जनः उन्नतिं करोति।
   (घ) महर्षिभिः आचारः परमो धर्मः कथितः।
   (ङ) सर्वैः जनैः स्वोन्नत्यै सदा सदाचारः पालनीयः।
3. (क) शरीरम्।
   (ख) सर्वैः।
   (ख) अक्रोधः।
   (ग) लभन्ते।

**12.** अधोलिखितपदयोः संधिविच्छेदं कृत्वा संधेः नामापि लिखतु। 2

1. मात्रंशः
2. वागीशः

**उत्तरम् :**

1. मातृ + अंशः (यण् संधि)।
2. वाक् + ईशः (जश्त्व संधि)।

**13.** अधोलिखितपदयोः संधिं कृत्वा सन्धेः नामापि लिखतु। 2

1. जगत् + ईशः
2. सुर + इन्द्रः

**उत्तरम् :**

1. जगदीशः (जश्त्व सन्धि)
2. सुरेन्द्रः (गुण सन्धि)

**14.** अधोलिखितरेखांकित–पदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत–

1. यथाशक्ति सहायतां करिष्यामि। 1
2. रामायणम् महत् काव्यम् अस्ति। 1
3. पाणी च पादौ च प्रक्षालनं कुरू। 1

**उत्तरम् :**

1. शक्तिम् अनतिक्रम्य, अव्ययीभावसमासः।
2. महाकाव्यम्, कर्मधारयसमासः।
3. पाणिपादम्, द्वन्द्वसमासः।

**15.** अधोलिखित रेखांकितपदेषु विभक्तिं तत् कारणं च लिखत।

1. विद्यालयं परितः वृक्षाः सन्ति। 1
2. अहं मित्रेण सह क्रीडामि। 1
3. विद्यालयात् पृथक् छात्रावासः अस्ति। 1

**उत्तरम् :**

1. द्वितीया विभक्तिः, 'परितः' योगे।
2. तृतीया विभक्तिः, 'सह' योगे।
3. पञ्चमी विभक्तिः, पृथक् योगे।

**16.** कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।

1. कार्यं तु सदैव ध्यानेन एव .......... । (कृ + अनीयर्) 1
2. .......... बालकः चित्रम् पश्यति। (पठ् + शतृ) 1

**उत्तरम् :**

1. करणीयम्
2. पठन्

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

1. सः ग्रामं गच्छान् तृणं पश्यति। 1
2. विद्योत्तमा नीतिमती आसीत्। 1

**उत्तरम् :**

1. गम् (गच्छ्) + शतृ।
2. नीति + मतुप् + ङीप्।

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु–

| अपि, इव, तत्र, यथा |
|---|

अपि, इव, तत्र, यथा

1. गृहीत .......... केशेषु मृत्युना धर्ममाचरेत्। 1
2. कथमहं .......... गच्छामि। 1
3. जननी जन्मभूमिश्च स्वर्गाद् .......... गरीयसी। 1

**उत्तरम् :**

1. गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।
2. कथमहं तत्र गच्छामि।
3. जननी जन्मभूमिश्च स्वर्गाद् अपि गरीयसी।

**निर्देशः– प्रश्नसंख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** रामेण ग्रामः गम्यते। 1

**उत्तरम् :**

रामः ग्रामं गच्छति।

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

**20.** सीतया पुस्तकं पठ्यते। 1

**उत्तरम् :**
सीता पुस्तकं पठति।

**21.** त्वां मां पृच्छति। 1

**उत्तरम् :**
त्वया अहं पृच्छये।

**22.** घटिका चित्रसहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–







1. मोहनः प्रातः काले .......... वादने विद्यालयं गच्छति। 1
2. चालकः .......... वादने कारयानं चालयति। 1

**उत्तरम् :**
1. मोहनः प्रातः काले **अष्टवादने** विद्यालयं गच्छति।
2. चालकः **सपादद्विवादने** कारयानं चालयति।

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–

1. द्वौ बालिके गच्छतः। 1
2. ग्रीष्मे पल्लवलानि शुष्यति। 1
3. मनुः मधुरः फलं खादति। 1

**उत्तरम् :**
1. द्वे बालिके गच्छतः।
2. ग्रीष्मे पल्लवलानि शुष्यन्ति।
3. मनुः मधुरं फलं खादति।

**24.** भवान् राजकीय–आदर्श–उच्च–माध्यमिक–विद्यालय–जयपुरस्य दशमकक्षायाः विद्यार्थी रमेशः। 4

भवतः पिता अतीव निर्धनः अस्ति। स्वस्य प्रधानाचार्याय शुल्कमुक्त्यर्थम् एकं प्रार्थनापत्रं लिखतु।

**उत्तरम् :**
सेवायाम्
श्रीमन्तः प्रधानाचार्या महोदयाः
राजकीयः आदर्श उच्च माध्यमिक विद्यालय
जयपुरः

**विषयः**– शुल्कमुक्त्यर्थम् प्रार्थना पत्रं।

महोदयाः!
सविनयम् निवेदयामि यत् अहं भवतां विद्यालये दशम् कक्षायाम् अध्ययनरतोऽस्मि। माध्यमिक परीक्षायां अहं प्रथम श्रेण्याम् उत्तीर्णः। मम पितुः आर्थिक स्थितिः दयनीया। सः एकः लघु कृषकः अस्ति। सः मम शिक्षार्थं प्रतिमासं शिक्षण शुल्कदातुं असमर्थः। अतः कृपया माम् पूर्ण शुल्क मुक्तं विधाय अनुगृह्णन्तु अत्र भवन्तः।

भवताम् कृपाकांक्षी
रमेशः
दिनांक : 10.7.20.... दशम् कक्षास्थः

**अथवा**

**24.** भवान् विनयः। स्वकीयं मित्रं राजेशं प्रति स्वविद्यालयस्य वार्षिकोत्सवविषये अधोलिखितपत्रं मंजूषापदसहायतया पूरयित्वा लिखतु। 4

| |
|---|
| परिवारे, वार्षिकोत्सवस्य, पत्रोत्तरं, स्वकरकमलेन, कुशलताम्, विविधाः, स्वीकृतवान्, पुरस्कारम् |

उदयपुरतः
दिनांक : 18.03.20....

प्रियमित्र राजेश।
नमस्ते।
अत्र अहं कुशलं, भवतः .......... कामये। फरवरी मासे पञ्चमे दिनांके मम विद्यालये .......... आयोजनम् अभवत्। अस्मिन् दिवसे .......... प्रतियोगिताः अभवन्। अहमपि धावनप्रतियोगितायां, वादविवादप्रतियोगितायां च भाग ..........। पुरस्कारवितरणसमारोहे अस्माकं क्षेत्रस्य विधायकमहोदयः .......... पुरस्कारवितरणं कृतवान्। अहमपि .......... प्राप्तवान्।

अस्तु .......... सर्वेभ्यः यथायोग्यं नमस्काराः, .......... शीघ्रमेव प्रेषणीयम्।

भवतः मित्रम्
विनयः

**उत्तरम् :**

उदयपुरतः
दिनांक : 18.03.20....

प्रियमित्र राजेश।
नमस्ते।
अत्र अहं कुशलं, भवतः कुशलताम् कामये। फरवरी मासे पञ्चमे दिनांके मम विद्यालये वार्षिकोत्सवेस्य आयोजनम् अभवत्। अस्मिन् दिवसे विविधा प्रतियोगिताः अभवन्। अहमपि धावनप्रतियोगितायां, वादविवादप्रतियोगितायां च भाग स्वीकृतवान्। पुरस्कारवितरणसमारोहे अस्माकं क्षेत्रस्य विधायकमहोदयः स्वकरकमलेन पुरस्कारवितरणं कृतवान्। अहमपि पुरस्कारम् प्राप्तवान्।

अस्तु परिवारे सर्वेभ्यः यथायोग्यं नमस्काराः, पत्रोत्तरम् शीघ्रमेव प्रेषणीयम्।

भवतः मित्रम्
विनयः

**25.** मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं संवादं पूरयत। 4

| |
|---|
| **मञ्जूषा**– करिष्यामि, मित्रम्, पुत्र, कृत्वा, क्रीडाक्षेत्रम्, गृहकार्यं, गच्छामि, क्रिकेट्–प्रतियोगिता। |

**माता** – .........., त्वम् कुत्र गच्छसि?
**पुत्रः** – मातः, अहम् ............ गच्छामि।
**माता** – किं तव .......... सम्पूर्णम् अस्ति?

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**पुत्रः** – यदा अहम् क्रीडाक्षेत्रात् आगमिष्यामि तदा ..........।
**माताः** – प्रतिदिनं तु गृहकार्यम् .......... खेलसि।
**पुत्रः** – मातः, अद्य .......... अस्ति।
**माता** – पश्य, तव .......... सुनीलः आगच्छति।
**पुत्रः** – .......... अहम्।

**उत्तरम् :**
**माता** – पुत्र, त्वम् कुत्र गच्छसि?
**पुत्रः** – मातः, अहम् क्रीडाक्षेत्रम् गच्छामि।
**माता** – किं तव गृहकार्यम् सम्पूर्णम् अस्ति?
**पुत्रः** – यदा अहम् क्रीडाक्षेत्रात् आगमिष्यामि तदा करिष्यामि।
**माताः** – प्रतिदिनं तु गृहकार्यम् कृत्वा खेलसि।
**पुत्रः** – मातः, अद्य क्रिकेट–प्रतियोगिता अस्ति।
**माता** – पश्य, तव मित्रम् सुनीलः आगच्छति।
**पुत्रः** – गच्छामि अहम्।

**26.** अधोलिखितषड् वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4

1. विद्या विनम्रता प्रदान करती है।
2. जननी और जन्मभूमि स्वर्ग से भी महान हैं।
3. विपत्ति के समय दोषारोपण करना ही कायरपुरुष का लक्षण है।
4. कृष्ण के चारों ओर बालक हैं।
5. हम सब नाटक देखते हैं।
6. राजेश महेश का मित्र है।

**उत्तरम् :**
1. विद्या ददाति विनयम्।
2. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।
3. विपत्काले विस्मय एव कापुरुषलक्षणम्।
4. कृष्णं परितः बालकाः सन्ति।
5. वयं नाटकं पश्यामः।
6. राजेशः महेशस्य मित्रम् अस्ति।

**27.** अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया संस्कृते षट् वाक्यानि रचयतु– 3

राजमार्गस्य चित्रम् वाहनानि
शीघ्रं गृहं भारयुक्तवस्तूनि
प्रेषयितुं शक्नुवन्ति दुर्घटनाः
सावधानेन चालयामः सम्भावनाः



**उत्तरम् :**
1. इदं राजमार्गस्य चित्रम् अस्ति।
2. राजमार्गे विविधानि वाहनानि चलन्ति।
3. जनाः शीघ्रं गृहं गन्तुं द्रुतगत्या वाहनानि चालयन्ति।
4. असावधानतया वाहनचालनेन दुर्घटनायाः सम्भावनाः भवन्ति।
5. राजमार्गे भारयुक्तवस्तूनि नीत्वा वाहनं न चालयेत्।
6. राजमार्गे सड़कसुरक्षार्थं सावधानेन वाहनानि चालयामः।

**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखत–

| **मञ्जूषा–** सत्पुरुषाः, कर्मणा, परस्य, हृदयं, प्रतिष्ठा, परोपकारः। |
|---|

परेषाम् प्राणिनामुपकारः परोपकरोऽस्ति। (i) .......... हितसम्पादनं मनसा वाचा (ii) .......... चान्येषां हितानुष्ठानमेव परोपकारशब्देन गृह्यते। संसारे (iii) .......... एव स गुणो विद्यते, येन मनुष्येषु सुखस्य (iv) .......... वर्तते। परोपकारेण (v) .......... पवित्रं सरलं सरसं सदयं च भवति। (vi) .......... कदापि न स्वार्थतत्पराः भवन्ति।

**उत्तरम् :**
परेषाम् प्राणिनामुपकारः परोपकरोऽस्ति। परस्य हितसम्पादनं मनसा वाचा कर्मणा चान्येषां हितानुष्ठानमेव परोपकारशब्देन गृह्यते। संसारे परोपकारः एव स गुणो विद्यते, येन मनुष्येषु सुखस्य प्रतिष्ठा वर्तते। परोपकारेण हृदयं पवित्रं सरलं सरसं सदयं च भवति। सत्पुरुषाः कदापि न स्वार्थतत्पराः भवन्ति।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। 3

1. लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।
2. एकः बुभुक्षितः शृगालः भोजनार्थं वने इतस्ततः भ्रमति स्म।
3. परं तथापि द्राक्षाफलानि न प्राप्नोत्।
4. एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।
5. 'एतानि द्राक्षाफलानि अम्लानि" इति उक्त्वा कुपितः शृगालः ततः गतः।
6. तानि खादितुं सः नैकवारं प्रयासम् अकरोत्।

**उत्तरम् :**
1. एकः बुभुक्षितः शृगालः भोजनार्थं वने इतस्ततः भ्रमति स्म।
2. एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।
3. लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।
4. तानि खादितुं सः नैकवारं प्रयासम् अकरोत्।
5. परं तथापि द्राक्षाफलानि न प्राप्नोत्।
6. "एतानि द्राक्षाफलानि अम्लानि" इति उक्त्वा कुपितः शृगालः ततः गतः।

□□□□□□□□

सभी गुरुजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।